


श्रीमत् वेदान्त रामानुज मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् श्रीवास योगीश्वर गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रीरङ्गनाताह्वय मुनिकृपया प्राप्त मोक्षाश्रमं तं
श्रीमत् वेदान्त रामनुज मुनिमपरम् संश्रये देशिकेन्द्रम्



श्रीमत् श्रीवास योगीश्वर मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् वेदान्त रामानुज गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रुत्यन्त रामानुज यति नृपतेः प्राप्त मोक्षाश्रमं तं
श्रीमत् श्रीवास रामनुजमुनिं संश्रये ज्ञानवार्धिम्



वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम्
तत्पाद युग्म सरसीरुह भृङ्गराजम्
त्रय्यन्त युग्म कृतभूरि परिश्रमं तं
श्रीरङ्ग लक्ष्मणमुनिम् शरणं प्रपद्ये

# श्री वेङ्कटेश अष्टोत्तर शतनामावळिः

***shrI ve~NkaTesha aShTottara shatanAmAvaLiH***

# श्री वेङ्कटेश अष्टोत्तर शतनामावळिः

ओं श्री वेङ्कटेशाय नमः
ओं शेषाद्रि निलयाय नमः
ओं वृषद्दक् गोचराय नमः
ओं विष्णवे नमः
ओं सदञ्जन गिरीशाय नमः
ओं वृषाद्रि पतये नमः
ओं मेरुपुत्र गिरीशाय नमः
ओं सरस्वामि तटीजुषे नमः
ओं कुमार कल्प सेव्याय नमः
ओं वज्रिदृक् विषयाय नमः
ओं सुवर्चला सुतन्यस्त सैनापत्य भराय नमः
ओं रमाय नमः
ओं पद्म नाभाय नमः
ओं सदा वायु स्तुताय नमः
ओं त्यक्त वैकुण्ठ लोकाय नमः
ओं गिरि कुञ्ज विहारिणे नमः
ओं हरिचन्दन गोत्रेन्द्र स्वामिने नमः
ओं शङ्करा जन्य नेत्राब्ज विषयाय नमः
ओं वसूपरि चरत्रात्रे नमः
ओं कृष्णाय नमः
ओं अब्धि कन्या परिष्-वक्त वक्षसे नमः
ओं वेङ्कटाय नमः
ओं सनकादि महायोगि पूजिताय नमः
ओं देवजित् प्रमुखानन्तदैत्य सङ्घ प्रणाशिने नमः
ओं श्वेत द्वीप वसन्मुक्त पूजिताङ्घ्रि युगाय नमः
ओं शेष पर्वत रूपत्व प्रकाशन पराय नमः
ओं सानुस्थापित तार्क्ष्याय नमः
ओं तार्क्ष्याचल निवासिने नमः
ओं मायागूढ विमानाय नमः
ओं गरुड स्कन्ध वासिने नमः
ओं अनन्त शिरसे नमः
ओं अनन्ताक्षाय नमः
ओं अनन्त चरणाय नमः
ओं श्रीशैल निलयाय नमः
ओं दामोदराय नमः
ओं नीलमेघ निभाय नमः
ओं ब्रह्मादि देव दुर्दर्श विश्वरूपाय नमः
ओं वैकुण्ठा गत सद्धेम विमानान्तर्गताय नमः
ओं अगस्त्याभ्यर्थित शेष जनदृक् गोचराय नमः
ओं वासुदेवाय नमः
ओं हरये नमः
ओं तीर्थ पञ्चक वासिने नमः
ओं वामदेव प्रियाय नमः
ओं जनकेष्ट प्रदाय नमः
ओं मार्कण्डेय महातीर्थ जातपुण्य प्रदाय नमः
ओं वाक्पति ब्रह्मदात्रे नमः
ओं चन्द्र लावण्य दायिने नमः
ओं नारायण नगेशाय नमः
ओं ब्रह्म क्लृप्तोत्सवाय नमः
ओं शङ्ख चक्र वरानम्रल सत्करतलाय नमः
ओं द्रवन्मृग-मदासक्त विग्रहाय नमः
ओं केशवाय नमः
ओं नित्य यौवन मूर्तये नमः
ओं अर्थितार्थ प्रदात्रे नमः

# श्री वेङ्कटेश अष्टोत्तर शतनामावळिः

ओं विश्व तीर्थाघ हारिणे नमः

ओं तीर्थ स्वामि सरस्नात जनाभीष्टदायिने नमः

ओं कुमार धारिका वास स्कन्दाभीष्ट प्रदाय नमः

ओं जानुदघ्न समुद्भूत पोत्रिणे नमः

ओं कूर्म मूर्तये नमः

ओं किन्नर द्वन्द्व शापान्त प्रदात्रे नमः

ओं विभवे नमः

ओं वैखानस मुनि श्रेष्ठ पूजिताय नमः

ओं सिंहाचल निवासाय नमः

ओं श्रीमन् नारायणाय नमः

ओं सद्भक्त नीलकण्ठार्च्य नृसिंहाय नमः

ओं कुमुदाक्ष गण श्रेष्ठ सैनापत्य प्रदाय नमः

ओं दुर्मेधः प्राणहर्त्रे नमः

ओं श्रीधराय नमः

ओं क्षत्रियान्त करामाय नमः

ओं मत्स्य रूपाय नमः

ओं पाण्डवारि प्रहर्त्रे नमः

ओं श्रीकराय नमः

ओं उपत्यका प्रदेशस्थ शङ्कर ध्यातमूर्तये नमः

ओं रुक्माब्ज सरसीकूल लक्ष्मीकृत तपस्विने नमः

ओं लसल्लक्ष्मी कराम्भोज दत्त कल्हारकस्रजे नमः

ओं शालग्राम निवासाय नमः

ओं शुकदृक् गोचराय नमः

ओं नारायणार्थिता शेष जनदृक् विषयाय नमः

ओं मृगया रसिकाय नमः

ओं वृषभासुर हारिणे नमः

ओं अञ्जनागोत्र पतये नमः

ओं वृषभाचल वासिने नमः

ओं अञ्जनासुत दात्रे नमः

ओं माधवीयाघ हारिणे नमः

ओं प्रियङ्गु प्रियभक्षाय नमः

ओं श्वेत कोलवराय नमः

ओं नील धेनु पयोधारा सेक-देहोद्भवाय नमः

ओं शङ्कर प्रिय मित्राय नमः

ओं चोळपुत्र प्रियाय नमः

ओं सुधर्मिणीसु चैतन्य प्रदात्रे नमः

ओं मधुघातिने नमः

ओं कृष्णाख्य विप्रवेदान्त देशिकत्व प्रदाय नमः

ओं वराहाचल नाथाय नमः

ओं बलभद्राय नमः

ओं त्रिविक्रमाय नमः

ओं महते नमः

ओं हृषीकेशाय नमः

ओं अच्युताय नमः

ओं नीलाद्रि निलयाय नमः

ओं क्षीराब्धि नाथाय नमः

ओं वैकुण्ठाचल वासिने नमः

ओं मुकुन्दाय नमः

ओं अनन्ताय नमः

ओं विरिञ्चि अभ्यर्थितानीत सौम्यरूपाय नमः

ओं सुवर्ण मुखरीस्नात मनुजाभीष्ट दायिने नमः

ओं हलायुध जगत्तीर्थ समस्त फलदायिने नमः

ओं गोविन्दाय नमः

ओं श्री श्रीनिवासाय नमः